# Dattatreya Stotram in Hindi – श्री दत्तात्रेय स्तोत्र

जटाधरं पाण्डुराङ्गं शूलहस्तं कृपानिधिम् ।
सर्वरोगहरं देवं दत्तात्रेयमहं भजे ॥ १ ॥

अस्य श्रीदत्तात्रेयस्तोत्रमन्त्रस्य भगवान्नारदऋषिः । अनुष्टुप् छन्दः ।
श्रीदत्तः परमात्मा देवता । श्रीदत्तात्रेय प्रीत्यर्थे जपे विनियोगः ॥

नारद उवाच ।

जगदुत्पत्तिकर्त्रे च स्थितिसंहारहेतवे ।
भवपाशविमुक्ताय दत्तात्रेय नमोऽस्तु ते ॥ १ ॥

जराजन्मविनाशाय देहशुद्धिकराय च ।
दिगम्बर दयामूर्ते दत्तात्रेय नमोऽस्तु ते ॥ २ ॥

कर्पूरकान्तिदेहाय ब्रह्ममूर्तिधराय च ।
वेदशास्त्रपरिज्ञाय दत्तात्रेय नमोऽस्तु ते ॥ ३ ॥

ह्रस्वदीर्घकृशस्थूलनामगोत्रविवर्जित ।
पञ्चभूतैकदीप्ताय दत्तात्रेय नमोऽस्तु ते ॥ ४ ॥

Panotbook.com

यज्ञभोक्ते च यज्ञाय यज्ञरूपधराय च ।
यज्ञप्रियाय सिद्धाय दत्तात्रेय नमोऽस्तु ते ॥ ५ ॥

आदौ ब्रह्मा हरिर्मध्ये ह्यन्ते देवस्सदाशिवः ।
मूर्तित्रयस्वरूपाय दत्तात्रेय नमोऽस्तु ते ॥ ६ ॥

भोगालयाय भोगाय योगयोग्याय धारिणे ।
जितेन्द्रिय जितज्ञाय दत्तात्रेय नमोऽस्तु ते ॥ ७ ॥

दिगम्बराय दिव्याय दिव्यरूपधराय च ।
सदोदितपरब्रह्म दत्तात्रेय नमोऽस्तु ते ॥ ८ ॥

जम्बूद्वीपे महाक्षेत्रे मातापुरनिवासिने ।
जयमान सतां देव दत्तात्रेय नमोऽस्तु ते ॥ ९ ॥

भिक्षाटनं गृहे ग्रामे पात्रं हेममयं करे ।
नानास्वादमयी भिक्षा दत्तात्रेय नमोऽस्तु ते ॥ १० ॥

ब्रह्मज्ञानमयी मुद्रा वस्त्रे चाकाशभूतले ।
प्रज्ञानघनबोधाय दत्तात्रेय नमोऽस्तु ते ॥ ११ ॥

Panotbook.com

अवधूत सदानन्द परब्रह्मस्वरूपिणे ।
विदेहदेहरूपाय दत्तात्रेय नमोऽस्तु ते ॥ १२ ॥

सत्यरूप सदाचार सत्यधर्मपरायण ।
सत्याश्रयपरोक्षाय दत्तात्रेय नमोऽस्तु ते ॥ १३ ॥

शूलहस्तगदापाणे वनमालासुकन्धर ।
यज्ञसूत्रधर ब्रह्मन् दत्तात्रेय नमोऽस्तु ते ॥ १४ ॥

क्षराक्षरस्वरूपाय परात्परतराय च ।
दत्तमुक्तिपरस्तोत्र दत्तात्रेय नमोऽस्तु ते ॥ १५ ॥

दत्त विद्याढ्य लक्ष्मीश दत्त स्वात्मस्वरूपिणे ।
गुणनिर्गुणरूपाय दत्तात्रेय नमोऽस्तु ते ॥ १६ ॥

शत्रुनाशकरं स्तोत्रम् ज्ञानविज्ञानदायकम् ।
सर्वपापं शमं याति दत्तात्रेय नमोऽस्तु ते ॥ १७ ॥

इदं स्तोत्रम् महद्दिव्यं दत्तप्रत्यक्षकारकम् ।
दत्तात्रेयप्रसादाच्च नारदेन प्रकीर्तितम् ॥ १८ ॥

इति श्री नारदपुराणे नारदविरचितं श्री दत्तात्रेय स्तोत्रम् ।

Panotbook.com

Panotbook.com